- श्रीविघ्नेश्वरध्यानम् -
- शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥ १॥
- वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे। यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्॥ २॥

---

(अनन्तरम् श्रीमच्छङ्करभगवत्पादगुरुपरम्परा अनुसन्धेया)

- ॐ नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रं पराशरं च। व्यासं शुकं गौडपादं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्।।
- श्री शङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्। तं तोटकं वार्त्तिककारमन्यानस्मद् गुरून् सन्ततमानतोऽस्मि॥
- सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्। अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥

---

- श्रीसरस्वतीप्रार्थना -
- दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना - हस्तेनैकेन पद्मम् सितमपि च शुकं पुस्तकं चापरेण। भासा

कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमानासमाना - सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना॥ ३॥

- श्रीवाल्मीकिनमस्क्रिया -
- कूजन्तं राम रामेति मधुरं मधुराक्षरम्। आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥ ४॥
- वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः। शृण्वन् रामकथानादं को न याति परां गतिम्॥ ५॥
- यः पिबन् सततं रामचरितामृतसागरम्। अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम्॥ ६॥
- श्रीहनुमन्नमस्क्रिया -
- गोष्पदीकृतवाराशिं मशकीकृतराक्षसम्। रामायणमहामालारत्नं वन्देऽनिलात्मजम्॥ ७॥
- अञ्जनानन्दनं वीरं जानकीशोकनाशनम्। कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम्॥ ८॥
- उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निम् जनकात्मजायाः। आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम्॥ ९॥

- आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम्।
  पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम्॥ १०॥
- यत्र यत्र रघुनाथ कीर्तनम् तत्र तत्र कृतमस्तकाञ्जलिम्।
  बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम्॥ ११॥
- मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
  वातात्मजम् वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि॥ १२॥
- श्रीरामायणप्रार्थना -
- यः कर्णाञ्जलिसम्पुटैरहरहः सम्यक् पिबत्यादराद्
  वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु।
  जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवम् - संसारं स विहाय
  गच्छति पुमान् विष्णोः पदं शाश्वतम्॥ १३॥
- तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम्।
  रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम्॥ १४॥
- वाल्मीकिगिरिसम्भूता रामसागरगामिनी। पुनातु भुवनं पुण्या
  रामायणमहानदी॥ १५॥

- श्लोकसारसमाकीर्णं सर्गकल्लोलसङ्कुलम्। काण्डग्राहमहामीनं वन्दे रामायणार्णवम्॥ १६॥
- वेदवेद्ये परे पुंसि जाते दशरथात्मजे। वेद प्राचेतसादासीत् साक्षाद्रामायणात्मना॥ १७॥
- श्रीरामध्यानम् -
- वैदेही सहितं सुरद्रुमतले हैमे महामण्डपे - मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम्। अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं - व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥ १८॥
- वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः - शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च। सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्ववान् - मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम्॥ १९॥
- नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै। नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः॥ २०॥

- **श्रीमद्रामायणपारायणसमापनक्रमः।** (Mangala shloka to be recited at the end)
- स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः। गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु॥ १॥
- काले वर्षतु पर्जन्यः पृथ्वी सस्यशालिनी। देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः॥ २॥
- अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः। अधनाः सधनाः सन्तु जीवन्तु शरदां शतम्॥ ३॥
- चरितं रघुनाथस्य शतकोटिप्रविस्तरम्। एकैकमक्षरं प्रोक्तं महापातकनाशनम्॥ ४॥
- शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा। स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा॥ ५॥
- रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथाय नाथाय सीतायाः पतये नमः॥ ६॥

- यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते। वृत्रनाशे समभवत्- तत्ते भवतु मङ्गलम्॥ ७॥
- यन्मङ्गलं सुपर्णस्य विनताऽकल्पयत् पुरा। अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम्॥ ८॥
- अमृतोत्पादने दैत्यान् घ्नतो वज्रधरस्य यत्। अदितिर्मङ्गलं प्रादात्- तत्ते भवतु मङ्गलम्॥ ९॥
- त्रीन् विक्रमान् प्रक्रमतो विष्णोरमिततेजसः। यदासी.न्मङ्गलं राम तत्ते भवतु मङ्गलम्॥ १०॥
- ऋतवः सागरा द्वीपा वेदा लोका दिशश्च ते। मङ्गलानि महाबाहो दिशन्तु तव सर्वदा॥ ११॥
- कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्। करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ १२॥
- यदक्षर पदभ्रष्टं मात्राहीनन्तु यद्भवेत्। तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तुते।।
- इति श्रीमद्रामायणपठनोपक्रमोपसंहारक्रमः समाप्तः।

# Sri Rama Stotram

- श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुकुलान्वयरत्नदीपम् ।
  आजानुबाहु.मरविन्ददलायताक्षं रामं निशाचरविनाशकरं नमामि॥
- वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्। अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥
- श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः । राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः॥ १ ॥
- जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः । विश्वामित्रप्रियो दान्तः शत्रुजिच्छत्रुतापनः॥ २॥
- वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः । सत्यव्रतो व्रतधरः सदा हनुमदाश्रितः॥ ३॥
- कौसलेयः खरध्वंसी विराधवधपण्डितः । विभीषणपरित्राता हरकोदण्डखण्डनः॥ ४॥
- सप्ततालप्रभेत्ता च दशग्रीवशिरोहरः । जामदग्न्यमहादर्प-दलन.स्ताटकान्तकः॥ ५॥

○ वेदान्तसारो वेदात्मा भवरोगस्य भेषजम् । दूषणत्रिशिरो हन्ता त्रिमूर्तिस्त्रिगुणात्मकः ॥ ६ ॥

○ त्रिविक्रम.स्त्रिलोकात्मा पुण्यचारित्रकीर्तनः । त्रिलोकरक्षको धन्वी दण्डकारण्यपावनः ॥ ७ ॥

○ अहल्याशापशमनः पितृभक्तो वरप्रदः । जितेन्द्रियो जितक्रोधो जितामित्रो जगद्गुरुः ॥ ८ ॥

○ ऋक्षवानरसंघाती चित्रकूटसमाश्रयः । जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥ ९ ॥

○ सर्वदेवादिदेवश्च मृतवानरजीवनः । मायामारीचहन्ता च महादेवो महाभुजः ॥ १० ॥

○ सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः । महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥ ११ ॥

○ सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः । आदिदेवो महादेवो महापूरुष एव च ॥ १२ ॥

○ पुण्योदयो दयासारः पुराणपुरुषोत्तमः । स्मितवक्त्रो मिताभाषी पूर्वभाषी च राघवः ॥ १३ ॥

- अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तमः । मायामानुषचारित्रो महादेवादिपूजितः ॥ १४ ॥
- सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः । श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः ॥ १५ ॥
- सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः । शिवलिङ्गप्रतिष्ठाता सर्वावगुणवर्जितः ॥ १६ ॥
- परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः । परं ज्योतिः परंधाम पराकाशः परात्परः ॥ १७ ॥
- परेशः पारगः पारः सर्वदेवात्मकः परः ॥
- इति श्रीरामाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥